## उपेयिवाननाश्वाननूचानश्च। (१०९/३०९८)

उपेयिवान् अनाश्वान् अनूचान इत्येते शब्दा निपात्यन्ते। उपपूर्वाद् इणः क्वसुः, द्विर्वचनमभ्यासदीर्घत्वं[1] (७.४.६९/२४५६), तत्सामर्थ्यदिकादेशप्रतिबन्धः, तत्र 'वस्वेकाजाद्धसाम्' (७.२.६७/३०९६) इत्यनेकाच्त्वादिण् न प्राप्नोति, स निपात्यते, अभ्यासस्य श्रवणं धातुरूपस्य यणादेशः (६.४.८१/२४५५)। उपेयिवान्। क्रादिनियमात्[2] (७.२.१३/२२९३) प्राप्तश्च 'वस्वेकाजाद्धसाम्' (७.२.६७/३०९६) इति प्रतिषिद्धः, स [3]पुनर् इट् प्रतिप्रसूयते, तेनाजादौ न भवति। उपेयुषः। [4]उपेयुषा। न चात्रोपसर्गास्तन्त्रम्, अन्योपसर्गपूर्वान्निरुपसर्गाच्च भवत्येव। समीयिवान्। ईयिवान्। वावचनानुवृत्तेश्च पूर्ववल् लुङादयो[5]ऽपि भवन्ति। उपागात्। उपैत्। उपेयाय। अश्नातेर्नञ्पूर्वात् क्वसुर्निपात्यते, इडभावश्च। अनाश्वान्। [6]नाशीत्। [7]नाश्नात्। [8]नाश। वचेरनुपूर्वात् कर्तरि कानज् निपात्यते। अनूचानः। अन्ववोचत्। अन्वब्रवीत्। अनूवाच॥

## लुङ्। (११०/२२१८)

[9]भूते इत्येव। भूतेऽर्थे वर्तमानाद्धातोः लुङ् प्रत्ययो भवति। अकार्षीत्। अहार्षीत्।

[२६९] वसतेर्लुङ् रात्रिविशेषे जागरणसन्ततौ [10]वक्तव्यः। (म.भा. २.११८)

क्व भवानुषितः। [11]अहमत्रावात्सम्[12]॥

## अनद्यतने लङ्। (१११/२२०५)

[13]भूते इत्येव। अनद्यतने इति[14] बहुव्रीहिनिर्देशः। अविद्यमानाद्यतने भूतेऽर्थे वर्तमानाद्धातोर्लङ् प्रत्ययो भवति। अकरोत्। अहरत्। बहुव्रीहिनिर्देशः [15]किमर्थः? अद्य ह्यो वा [16]अभुक्ष्महि इति व्यामिश्रे मा भूत् (म. भा. २. ११८)।

[२७०] परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ् वक्तव्यः। (म.भा. २.११९)

अरुणद्यवनः साकेतम्। अरुणद् यवनो [17]माध्यमिकान् इति॥

## अभिज्ञावचने लृट्। (११२/२७७३)

अभिज्ञा स्मृतिः। तद्वचने उपपदे [18]भूतानद्यतने लृट् प्रत्ययो भवति। [19]लङोऽपवादः। अभिजानासि देवदत्त [20]कश्मीरेषु वत्स्यामः। वचनग्रहणं [21]पर्यायार्थम्, अभिजानासि, स्मरसि, बुध्यसे, [22]चेतयसे इति॥

---

1. च इति इत्यधिकम् अ.ब, क्ङिति च इति दीर्घः इत्यधिकम् क. 2. इट् इत्यधिकम् फ. 3. पुनरपि क, इट् नास्ति फ. 4. उपेयुषे ब.क. 5. अपि नास्ति ब. 6. लुङि इत्यधिकम् फ. 7. लङि इत्यधिकम् फ. 8. लिटि इत्यधिकम् फ. 9. भूते इत्येव नास्ति ब.क. 10. वक्तव्यः नास्ति फ. 11. अमुत्र अ.फ. 12. अङ प्रत्ययो भवति इत्यधिकम् अ. 13. भूते इत्येव नास्ति फ, भूते इति वर्तते ह. 14. विशिष्टेऽर्थे इत्यधिकम् फ. 15. किम् अ. 16. अभुंक्ष्महि फ. 17. माध्यमिकाम् फ, माध्यमिकम् क, माध्यमिकीं अ. 18. भूतेऽर्थे ड.ह. 19. लुङोऽपवादः ब. 20. मगधेषु अ.क.ड.ह, मगधेषु अवसाम ग. 21. पर्यायार्थे ब. 22. चेतसि अ.क, इति नास्ति फ, चेतसे इति ब.